## हरतेरनुद्यमनेऽच् । (९/२९२३)

हरतेर्धातोरनुद्यमने[1] वर्तमानात् [2]कर्मणि उपपदे अच् प्रत्ययो भवति । अणोऽपवादः । उद्यमनम् उत्क्षेपणम् । [3]अंशं हरति [4]अंशहरः । रिक्थहरः[5] । अनुद्यमने इति किम् ? [6]भारहारः ।

[२३५] अच्प्रकरणे शक्तिलाङ्गलाङ्कुशयष्टितोमरघटघटी[7]धनुष्षु ग्रहेरुपसङ्ख्यानम् । (म.भा.२.९९)

शक्तिग्रहः । लाङ्गलग्रहः । अङ्कुशग्रहः । यष्टिग्रहः । तोमरग्रहः । घटग्रहः । [8]घटीग्रहः । धनुर्ग्रहः ।

[२३६] सूत्रे च धार्यर्थे । (म.भा.२.९९)

[9]सूत्रग्रहः । सूत्रं [20]धारयति इत्यर्थः । सूत्रग्राहः एवान्यः ॥

## वयसि च । (१०/२९२४)

वयसि गम्यमाने हरतेः[11] कर्मण्युपपदे अच् प्रत्ययो भवति[12] । उद्यमनार्थोऽयमारम्भः । कालकृता शरीरावस्था यौवनादिर्वयः[13] । यदुद्यमनं क्रियमाणं सम्भाव्यमानं वा वयो गमयति, तत्रायं विधिः । अस्थिहरः श्वा । कवचहरः क्षत्रियकुमारः[14] ॥

## आङि ताच्छील्ये । (११/२९२५)

आङ्पूर्वाद् हरतेः[15] कर्मण्युपपदे अच् प्रत्ययो भवति ताच्छील्ये गम्यमाने । ताच्छील्यं तत्स्वभावता । पुष्पाहरः । फलाहरः । पुष्पाद्याहरणे स्वाभाविकी [16]फलानपेक्षा प्रवृत्तिरस्य इत्यर्थः । ताच्छील्ये इति किम् ? [17]भारमाहरति इति भाराहारः ॥

## अर्हः । (१२/२९२६)

'अर्ह पूजायाम्' (धा.पा.७४०), अस्माद्धातोः कर्मण्युपपदे अच्प्रत्ययो भवति । अणोऽपवादः[18] । [19]स्त्रीलिङ्गे विशेषः । पूजार्हा । [21]गन्धार्हा । [22]मालार्हा ॥

## स्तम्बकर्णयो रमिजपोः । (१३/२९२७)

स्तम्ब कर्ण इत्येतयोः सुबन्तयोरुपपदयोर्यथासङ्ख्यं रमिजपोः धात्वोः [23]अच्प्रत्ययो भवति । रमेः अकर्मकत्वात्, जपेः शब्दकर्मकत्वात् कर्म न सम्भवति इति सुपि इत्येतदिहाभिसम्बध्यते ।

[२३७] हस्तिसूचकयोरिति वक्तव्यम् । (म.भा.२.९९)

[24]स्तम्बे रमते इति स्तम्बेरमः हस्ती । [25]कर्णे जपति इति कर्णेजपः [26]सूचकः । हस्तिसूचकयोः इति किम् ? स्तम्बे रन्ता । कर्णे जपिता [27]मशकः ॥

---

1. अर्थे इत्यधिकम् क. ड. फ. 2. कर्मणि नास्ति फ. 3. अंशं हरति नास्ति अ. 4. अंशहरः नास्ति फ. 5. कवचहरः इत्यधिकम् अ. 6. भारं हरति इति इत्यधिकम् फ. 7. °जुटी ब. 8. तुरीग्रहः ब. 9. सूत्रग्रहः विद्वान् ड. 10. संधारयति ड. 11. धातोः इत्यधिकम् ब. फ. 12. अणोऽपवादः इत्यधिकम् फ. 13. उच्यते इत्यधिकम् ब. फ. 14. वयसि इति किम् ? भारहारः इत्यधिकम् क. फ. 15. धातोः इत्यधिकम् क. 16. फलनिरपेक्षा ब. क. फ. 17. हारमाहरति इति हाराहारः फ. 18. पूजार्हो ब्राह्मणः इत्यधिकम् क. 19. स्त्रियां विशेषः ब. क. 20. पूजार्हा ब्राह्मणी अ. ब. ग. फ. 21. गन्धार्हा मालार्हा नास्ति फ. 22. माल्यार्हा ड. 23. अच् नास्ति ब. 24. स्तम्बे रमते इति नास्ति फ. 25. कर्णे जपति नास्ति फ. 26. खलः क.फ. 27. मशकः नास्ति क. ड.